# 5 प्रभातवर्णनम्

चन्द्रः अस्तं गच्छति
सूर्यः उदयं गच्छति।
परितो भवति प्रकाशः
मन्दं चलति समीरः
मधुपो भवति सधीरः॥





कलिकावृन्दं विकसति
लतिकावृन्दं विलसति
निद्रा तन्द्रा भग्ना
जनता कर्मणि लग्ना
सकले नव उल्लासः
वदने वदने हासः॥

पथि पथि जनसञ्चारः
नूपुर-रव-झङ्कारः
विटपे खगकुलरवः
चरितुं चलिता गावः॥



हस्ते हस्ते पत्रम्
वदने वदने स्तोत्रम्
खेलति बालकवृन्दं
गीतं गायं गायम् ॥

– वासुदेव द्विवेदी शास्त्री



## टिप्पणी

**परितः** ચારેબાજુ **समीरः** પવન **मधुपः** – ભમરો **सधीरः** ધીરજવાળું **तन्द्रा** આળસ **भग्ना** તૂટી, પૂરી થઈ **हासः** હાસ્ય **रवः** અવાજ **खग** પક્ષી **विटपे** ડાળીએ, **गावः** ગાયો, **लग्ना** લાગેલી છે, વ્યસ્ત **पथि** રસ્તામાં

## स्वाध्यायः

**1. નીચેના શબ્દોનું મોટેથી ઉચ્ચારણ કરો :**

चन्द्रः, प्रकाशः, वृन्दम्, लतिकावृन्दम्, निद्रा, तन्द्रा, भग्ना, लग्ना, उल्लासः, हासः, जनसञ्चारः, झङ्कारः।

**2. નીચે આપેલા વિકલ્પોમાંથી સાચો વિકલ્પ શોધી પ્રશ્નોના જવાબ આપો :**

(1) सूर्योदयः कदा भवति ?

(1) सूर्योदयः सायंकाले भवति।

(2) सूर्योदयः प्रभाते भवति।

(3) सूर्योदयः मध्याह्ने भवति।

(2) सूर्योदयस्य अनन्तरं जनाः किं कुर्वन्ति ?

(1) सूर्योदयस्य अनन्तरं जनाः कर्मणि लग्नाः भवन्ति।

(2) सूर्योदयस्य अनन्तरं जनाः वार्तालापमग्नाः भवन्ति।

(3) सूर्योदयस्य अनन्तरं जनाः निद्रामग्नाः भवन्ति।

(3) प्रभातकाले वदने वदने किम् अस्ति ?

(1) वदने वदने चिन्ता अस्ति।

(2) वदने वदने रुदनम् अस्ति।

(3) वदने वदने हासः भवति।

(4) बालकवृन्दं प्रभातकाले किं करोति ?

(1) बालकवृन्दं प्रभातकाल खेलति।

(2) बालकवृन्दं प्रभातकाल शयनं करोति।

(3) बालकवृन्दं प्रभातकाल पूजां करोति।

**3. કૌંસમાં આપેલા શબ્દોનો ઉપયોગ કરી વાક્ય બનાવો :**

(अश्वः, गजः, शशकः, महिषः)

ઉદાહરણ : मन्दं चलति समीरः।

(1) शीघ्रं ______________ ।

(2) मन्दं ______________ ।

(3) शीघ्रं ______________ ।

(4) मन्दं ______________ ।

**4. આપેલા શબ્દોના વિરોધી શબ્દ કૌંસમાંથી શોધીને લખો :**

(अधीरः, शीघ्रम्, जागरणम्, अस्तः)

(1) मन्दम् ______________ ।　　(2) उदयः ______________ ।

(3) सधीरः ______________ ।　　(4) निद्रा ______________ ।

**5. આપેલા શબ્દોના સમાનાર્થી શબ્દો કૌંસમાંથી શોધીને લખો :**

(सुधाकरः, दिवाकरः, भ्रमरः, अनिलः, धेनवः)

(1) समीरः ______________ ।

(2) सूर्यः ______________ ।

(3) मधुपः ______________ ।

(4) चन्द्रः ______________ ।

(5) गावः ______________ ।

6. **નીચેની કાવ્યપંક્તિઓ સુવાચ્ય અક્ષરે ફરી લખો :**

कलिकावृन्दं विकसति। ____________________

लतिकावृन्दं विलसति। ____________________

निद्रा तन्द्रा भग्ना। ____________________

जनता कर्मणि लग्ना। ____________________

सकले नव उल्लासः। ____________________

वदने वदने हासः॥ ____________________

7. ઉદાહરણમાં દર્શાવ્યા પ્રમાણે વૃન્દ શબ્દનો ઉપયોગ આપેલા શબ્દોની મદદથી કરો.

सखी, मित्र, गायक, वादक, गोप, बाल   ઉદાહરણ : सखी – सखीवृन्द

**प्रवृत्ति :**

- તમારી શાળાના પુસ્તકાલયમાંથી પ્રભાત વર્ણનનાં અન્ય કાવ્યો શોધીને લખો તથા રાગમાં ગાવાનો પ્રયત્ન કરો.
- સવારના સમયનું ગામ, નગર કે શેરીનું ચિત્ર દોરી રંગ પૂરો.
- તમારી અને તમારા આજુબાજુના લોકોની સવારની દિનચર્યાની વિગત મેળવી નોંધપોથીમાં લખો.

**हसाम:**

"मम शुनकः कुत्रापि अदृश्यतां गतः।"

"एवम्! तर्हि वर्तमानपत्रे विज्ञापिकां प्रकाशयतु भवान् ।"

"किं तेन ? मम शुनकः पठितुं न जानाति।"